पुष्करिण्यां यः कुर्य्याद्दन्तधावनम्। तावज्ज्ञेयः स चाण्डालो यावद् गङ्गां न पश्यति। भगवत्युदिते सूर्य्ये यः कुर्य्याद्दन्तधावनम्। तद्दन्तकाष्ठैं पितरो भुक्त्वा गच्छन्ति दुःखिनः। उपवासदिने विप्र! पितृश्राद्धदिने तथा। न च तत्फलमाप्नोति दन्तधावन कृन्नरः। प्रभाते मार्जयेद्दन्तान् वाससा रसनां तथा। कुर्य्याद्द्वादश विप्रेन्द्र! कवलानि जलैर्बुधः। उपवासे पितृश्राद्धे विधिनानेन जैमिने!। दन्तधावनकृन्मर्त्यः संपूर्णं लभते फलम्" पाद्मे क्रियायोगसारः। "उषःकाले तु सम्प्राप्ते शौचं कृत्वा यथार्थवत्। ततः स्नानं प्रकुर्व्वीत दन्तधावनपूर्वकम्। मुखे पर्य्युषिते नित्यं भवत्यप्रयतो नरः। तस्मात् सर्वप्रयत्नेन भक्षयेद्दन्तधावनम्। कदम्बबिल्वखदिरकरवीरवटार्जुनाः। नगरं वृहती जातीकरञ्जार्कातिमुक्तकाः। जम्बूमधूकापामार्गशिरीषोडुम्बरासनाः। चीरिकण्टकिवृक्षाद्याः प्रशस्ता दन्तधावने। कटुतिक्तकषायाश्च धनारोग्यसुखप्रदाः। प्रक्षाल्य भुक्त्वा च शुचौ देशे त्यक्त्वा तदाचमेत्। अमावास्यां तथा षष्ठ्यां नवम्यां प्रतिपद्यपि। वर्जयेद्दन्तकाष्ठन्तु तथैवार्कस्य वासरे। अभावे दन्तकाष्ठस्य निषिद्धायां तथा तिथौ। अपां द्वादश गण्डूषैः कुर्व्वीत मुखशोधनम्" इति गारुड़े २१४ अ० "मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम्। पूर्वाह्ण एव कुर्वीत देवतानाञ्च पूजनम्" मनुः।

**दन्तपत्र** न० दन्त इव पत्रमत्र। दन्ताकारपत्रयुक्ते कर्णभूषणभेदे शब्दर०। "विलासिनीविभ्रमदन्तपत्रम्"रघुः "कर्णावसक्तामलदन्तपत्रम्"कुमा० दन्तः गजदन्तः तन्निर्मितं पत्रम्। २गजदन्तनिर्म्मिते पत्राकारे कर्णभूषणभेदे च "अहृदये! त्वद्धाय निपतितं दन्तपत्रम्" काद०।

**दन्तपत्रक** न०दन्त इव शुभ्रं पत्रं दलं यस्य कप्। कुन्दपुष्पे शब्दच०। स्वल्पार्थे ङीपि अत इत्वम्। दन्तपत्रिका स्वल्पे तत्रार्थे स्त्री विदग्धलीलोचितदन्तपत्रिका" माघः

**दन्तपवन** न० दन्तं पुनाति अनेन पू-करणे ल्युट्। १दन्तकाष्ठे। भावे ल्युट्। २दन्तधावने च। तत्प्रकारो भावप्र० उक्तो यथा

"तत्रादौ दन्तपवनं द्वादशाङ्गुलमायतम्। कनिष्ठिकापरीणाहमृज्वग्रथितमव्रणम्। अयुग्मग्रन्थि यच्चापि प्रत्यग्रं शस्तभूमिजम्। अवेक्ष्यर्त्तुञ्च दोषञ्च रसं वीर्य्यञ्च योजयेत्। कषायं मधुरं तिक्तं कटुकं प्रातरुत्थितः। निम्बश्च तिक्तके श्रेष्ठः कषाये खदिरस्तथा। मधूको मधुरे श्रेष्ठः करञ्जः कटुके तथा। क्षौद्रव्योषत्रिवर्गाक्तं सतैलं सैन्धवेन च। चूर्णेन तेजोवत्यां च दन्तान्नित्यं विशोधयेत्। एकैकं घर्षयेद्दन्तं मृदुना कूर्चकेन च। दन्तशोधनचूर्णेन दन्तमांसान्यबाधयन्। तद्दौर्गन्ध्योपदेहौ तु श्लेष्माणं चापकर्षति। वैशद्यमन्नाभिरुचिं सौमनस्यं करोति च। न खादेद्गलताल्वोष्ठजिह्वारोगसमुद्भवे। अथास्यपाके श्वासे च कासहिक्कावमीषु च। दुर्बलोऽजीर्णभक्तश्च मूर्च्छार्त्तो मदपीड़ितः। शिरोरुगार्त्तस्तृषितः श्रान्तःपानक्लमान्वितः। अर्दितः कर्णशूली च दन्तरोगी च वर्जयेत्"

**दन्तपात** पु०६त०। १दन्तानां पतने। २वर्षभेदे अश्वानां स्वतो दन्तविशेषपतने च तत्कालश्च वृ० सं०६६अ० उक्तो यथा "षड्भिर्दन्तैः सिताभैर्भवति हयशिशुस्तैः कषायैर्द्विवर्षः सन्दंशैर्मध्यमान्त्यैः पतितसमुदितैस्त्र्यब्दपञ्चाब्दिकोऽश्वः। सन्दंशानुक्रमेण त्रिकपरिगताः कालिकापीतशुक्लाः काचा माक्षीकशङ्खावटचलनतो दन्तपातञ्च विद्धि"

**दन्तपाली** स्त्री ६त०। दन्ताग्रे "ताल्वोष्ठदन्तपालीजिह्वानेत्रान्तपायुकरचरणैः। रक्तैस्तु रक्तसारा बहुसुखवनितार्थपुत्रयुताः" वृ० स० ६८ अ०।

**दन्तपुप्पुटक** पु० दन्तरोगभेदे दन्तरोगशब्दे सुश्रुतवाक्यम्।

**दन्तपुष्प** न०दन्त इव शुभ्रं पुष्पमस्य। १कुन्दे, २कतकफले च शब्दच०।

**दन्तफल** न० दन्त इव शुभ्रं फलमस्य। १कतकफले शब्दच० दन्तवत् शुभ्रं फलमस्य। २कपित्थे पु० ३पिप्पल्याम् राजनि० स्त्री टाप्।

**दन्तभाग** पु० दन्तसम्बन्धी भागः। गजस्य मुखात् स्कन्धपर्य्यन्ते अग्रभागे अमरः।

**दन्तमल** न० ६त०। दन्तलग्नक्लेदे हारा०।

**दन्तमांस** न० दन्तसंलग्नं मांसम्। दन्तसंलग्नमांसे (मेड़े) ख्याते मांसभेदे।

**दन्तमूल** न० दन्तरोगभेदे दन्तरोगशब्दे दृश्यम्।

**दन्तमूलिका** स्त्री दन्त इव शुभ्रं मूलं यस्याः कप्। दन्तीवृक्षे राजनि०। [दृश्यम्।

**दन्तमूलीय** पु० दन्तमूले भवः छ। तवर्गादौ। दन्त्यशब्दे

**दन्तरोग** पु० ६त०। मुखरोगान्तर्गते दन्तदन्तमूलगते रोगभेदे स च रोग. सुश्रुते उक्तो यथा।

"अथातो मुखरोगाणां निदानं व्याख्यास्यामः। मुख-